# चतुर्दशः पाठः

## पण्डितराजस्य अन्योक्तयः

संस्कृतसाहित्ये प्रबन्धकाव्यरचनेव मुक्तकाव्यरचनायाः परम्परा अपि प्रचलिता अस्ति। अस्यां परम्परायां कानिचन मुक्तकपद्यसङ्कलनानि बहुप्रसिद्धानि सन्ति। तेषु पण्डितराजजगन्नाथविरचितः 'भामिनीविलासः' सर्वविदितोऽस्ति। अस्मिन् मुक्तकसङ्ग्रहे चत्वारः विलासाः सन्ति। येषु प्रथमः अन्योक्तिविलासोऽस्ति। अत्र पाठे तस्मात् अन्योक्तिविलासात् पद्यानि सङ्ग्रहीतानि सन्ति। एतानि अन्योक्ति पद्यानि वैदग्ध्यपूर्णानि सहृदयहृदयचमत्कारकारकाणि सन्ति।

**समुपागतवति दैवादवहेलां कुटज मधुकरे माऽगाः।**
**मकरन्दतुन्दिलानामरविन्दानामयं महामान्यः॥1॥**

**अन्वयः** - हे कुटज दैवात् समुपागतवति मधुकरे अवहेलां माऽगाः (यतः) अयं (मधुकरः) मकरन्द-तुन्दिलानां अरविन्दानां महामान्यः (अस्ति)।

**शब्दार्थः** - कुटज = वृक्षविशेषः (अल्प मकरन्दवान्) तस्य सम्बोधने, दैवात् = दैवयोगात् मधुकरे-भ्रमरे, अवहेलाम् = अवमाननाम्, मा = न।

**तावत्कोकिल विरसान् यापय दिवसान् वनान्तरे निवसन्।**
**यावन्मिलदलिमालः कोऽपि रसालः समुल्लसति॥2॥**

**अन्वयः** - कोकिल, वनान्तरे निवसन् विरसान् दिवसान् तावत् यापय यावत् मिलदलिमालः कोऽपि रसालः समुल्लसति।

**शब्दार्थः** - वनान्तरे = अन्यस्मिन् वने, निवसन् = निवासं कुर्वन, विरसान् = शुष्कान्, यापय = गमय, रसालः = आम्रवृक्षः, मिलदलिमालः = भ्रमरमालयुक्तः, समुल्लसति = समुत्फुल्लति।

**अयि मलयज! महिमाऽयं कस्य गिरामस्तु विषयस्ते।**
**उद्गिरतो यद्गरलं फणिनः पुष्णासि परिमलोद्गारैः॥3॥**

**अन्वयः** - अयि मलयज, ते अयम् महिमा कस्य गिरां विषयः अस्तु यत् गरलम् उद्गिरतः फणिनः (तानपि त्वं) परिमलोद्गारैः पुष्णासि।

**शब्दार्थः** - मलयज = चन्दनम्, गिराम् = वाणीनाम्, गरलम् = विषम्, उद्गिरतः = मुखात् निःसारयतः, फणिनः = सर्पस्य, परिमलोद्गारैः = सुगन्धदानैः, पुष्णासि = पोषयसि।

**पाटीर तव पटीयान्कः परिपाटीमिमामुरीकर्तुम्।**
**यत्पिषतामपि नृणां पिष्टोऽपि तनोषि परिमलैः पुष्टिम्॥4॥**

**अन्वयः** - पाटीर तव परिपाटीं उरीकर्तुं कः पटीयान् यत्पिषताम् नृणां पिष्टः अपि (तानापि) परिमलैः पुष्टिम् तनोषि।

**शब्दार्थः** - पाटीर = हे चन्दनवृक्ष! परीपाटीम् = परम्पराम्, उरीकर्तुम् = स्वीकर्तुम्, पटीयान् = कुशलः, पिषताम् = चूर्णं कुर्वताम्, नृणाम् = नराणाम्, पिष्टः = चूर्णीकृतः घृष्टः, परिमलैः = सुगन्धैः, पुष्टिम् = पोषणम्।

नीरक्षीरविवेके हंसालस्यं त्वमेव तनुषे चेत्।
विश्वस्मिन्नधुनान्यः कुलव्रतं पालयिष्यति कः॥5॥

**अन्वयः** - हंस, नीर-क्षीर-विवेके त्वमेव आलस्यं तनुषे चेत्, अधुना विश्वस्मिन् अन्यः कः कुलव्रतं पालयिष्यति?

**शब्दार्थः** - तनुषे = करोषि, कुलव्रतम् = कुलाचरणम्।

गुञ्जति मञ्जु मिलिन्दे मा मालति मौनमुपयासीः।
शिरसा वदान्यगुरवः सादरमेनं वहन्ति सुरतरवः॥6॥

**अन्वयः** - मालति! मञ्जु गुञ्जति मिलिन्दे मौनं मा उपयासीः (यतः) वदान्यगुरवः सुरतरवः एनं सादरं शिरसा वहन्ति।

**शब्दार्थः** - मञ्जु = मधुरम्, मिलिन्दे = भ्रमरे, उपयासीः = गच्छ, मानम् = कोपम्, वदान्यः = उदारः, सुरतरवः = कल्पवृक्षाः।

कृतमपि महोपकारं पय इव पीत्वा निरातङ्कम्।
प्रत्युत हन्तुं यतते काकोदरसोदर खलो जगति॥7॥

**अन्वयः** - काकोदरसोदर! खलः जगति कृतं महोपकारं पय इव निरातङ्कम् पीत्वा अपि (प्रत्युत) हन्तुं यतते।

**शब्दार्थः** - काकोदरसोदरः = सर्पसहोदरः (सर्पबन्धुः), खलः = दुष्टः, निरातङ्कम् = निरापदम्, यतते = प्रयत्नं करोति।

अमितगुणोऽपि पदार्थः दोषेणैकेन निन्दितो भवति।
निखिलरसायनमहितो गन्धेनाग्रेण लशुन इव॥8॥

**अन्वयः** - अमितगुणोऽपि पदार्थः एकेन दोषेण निन्दितः भवति (यथा) निखिलरसायनमहितो लशुनः इव अग्रेण गन्धेन (निन्दितः भवति)।

**शब्दार्थः** - अमितगुणः = असीमितगुणः, निन्दितः = गर्हितः, निखिलरसायनमहितः = सम्पूर्णरसायनयुक्तः, लशुनः = रसोनः (लहसुन)।

याते मय्यचिरान्निदाघमिहिरज्वालाशतैः शुष्कतां, गन्ता कं प्रति पान्थसन्ततिरसौ सन्तापमालाकुला।
एवं यस्य निरन्तराधिपटलैर्नित्यं वपुः क्षीयते, धन्यं जीवनमस्य मार्गसरसो धिग्वारिधीनां जनुः॥9॥

**अन्वयः** - निदाघमिहिरज्वालाशतैः अचिरात् शुष्कतां याते मयि असौ सन्तापमालाकुला कं प्रति गन्ता। एवं निरन्तराधिपटलैः यस्य मार्गसरसः वपुः नित्यं क्षीयते (तस्य) जीवनं धन्यं (किन्तु) वारिधीनां जनुः धिक्।

**शब्दार्थः** - निदाघमिहिरज्वालाशतैः = ग्रीष्मर्तौः सूर्यस्य प्रचण्डज्वालाशतैः, पान्थसन्ततिः = पथिकसमूहः, जनुः = जन्म।

भुक्ता मृणालपटली भवता निपीतान्यम्बूनि यत्र नलिनानि निषेवितानि।
रे राजहंस वद तस्य सरोवरस्य, कृत्येन केन भवितासि कृतोपकारः॥10॥

**अन्वयः** - रे राजहंस, वद यत्र भवता मृणालपटली भुक्ता, अम्बूनि निपीतानि, नलिनानि निषेवितानि तस्य सरोवरस्य केन कृत्येन कृतोपकारः भवितासि।

**शब्दार्थः** - मृणालपटली = कमलनालिका, निषेवितानि = सेवितानि, भवितासि = भविष्यति।

औदार्यं भुवनत्रयेऽपि विदितं सम्भूतिरम्भेनिधेः, वासो नन्दनकानने परिमलो गीर्वाणचेतोहरः।

एवं दातृगुरोर्गुणाः सुरतरोः सर्वेऽपि लोकोत्तराः, स्यादर्थिप्रवरार्थितार्पयणविधावेको विवेको यदि॥11॥

**अन्वयः** – औदार्यं सुरतरोः भुवनत्रयेऽपि विदितम्, अम्भोनिधेः सम्भूतिः, नन्दनकानने वासः, गीर्वाणचेतोहरः परिमलः, एवं दातृगुरोः सर्वेऽपि गुणाः लोकोत्तराः यदि अर्थिप्रवरार्थितार्पणविधौ एकः विवेकः स्यात्।

**शब्दार्थः** – सुरतरोः = कल्पवृक्षस्य, अम्भोनिधेः = समुद्रात्, सम्भूतिः = उत्पत्तिः, गीर्वाणचेतोहरः = देवानां, चित्तहरः, लोकोत्तराः = अलौकिकाः, अर्थिप्रवरार्थितार्पणविधौ = श्रेष्ठयाचककांक्षितवस्तुदानकार्ये, परिमलः = सुगन्धः।

## अभ्यासः

### प्रश्नवैविध्यम्

1. **एकपदेन उत्तरं लिखत –**

   क. अरविन्दानां कः महामान्यः?

   ख. मलयजः कं पुष्णाति?

   ग. कः पिष्टोऽपि परिमलैः पुष्टिं तनोति?

   घ. नीरक्षीरविवेकं कः करोति?

   ङ. सुरतरवः कं शिरसा वहन्ति?

   च. कस्य औदार्यं विदितम्?

2. **एकवाक्येन उत्तरं लिखत –**

   क. कस्य सलिलं तृषितानां वदनं न प्रयाति?

   ख. कः पदार्थः अमितगुणः भवति?

   ग. कीदृशानाम् अरविन्दानां मधुकरः महामान्यः अस्ति।

   घ. कोकिलः वनान्तरे निवसन् किं कुर्यात्?

   ङ. कस्य जीवनं धन्यम्?

3. **रिक्तस्थानानि पूरयत–**

   क. कुटज! समुपागतवति मधुकरे .............. माऽगाः।

   ख. यावत् रसालः ..............।

   ग. विश्वस्मिन् अन्यः कः .............. पालयिष्यति।

   घ. मिलिन्दे गुञ्जति मालति! मा .............. उपयासीः।

   ङ. खलः महोपकारं पय इव पीत्वा .............. यतते।

### भाषिककार्यम्

4. **पाठात चित्वा पञ्च विशेषणपदानि लिखत।**

5. **पाठात चित्वा पञ्च विशेष्यपदानि लिखत।**

6. **क्रियापदानि पृथक् कुरुत –**

| | | | |
|---|---|---|---|
| क. | समुपागतवति | ख. | यापय |
| ग. | निवसन् | घ. | पुष्णासि |
| ङ. | तनोषि | च. | निषेवितानि |

7. **लकारपुरुषवचनानि लिखत –**

क. गुञ्जति

ख. वहन्ति

ग. यतते

घ. प्रपेदे

ङ. यापय

च. भवितासि

8. **अधोलिखितानां पदानां सन्धिविच्छेदं कुरुत –**

क. कोऽपि

ख. पिष्टोऽपि

ग. अधुनान्यः

घ. हंसालस्यम्

ङ. महोपकारम्

च. सन्ततिरसौ

9. **अधोलिखितानां समासविग्रहं लिखत –**

क. परिमलोद्गारैः

ख. महोपकारम्

ग. अमितगुणः

घ. मकरन्दतुन्दिलानाम्

च. दातृगुरोः

10. **प्रकृतिप्रत्ययौ पृथक् कुरुत –**

| | | | |
|---|---|---|---|
| क. | कृतम् | ख. | हन्तुम् |
| ग. | निन्दितः | घ. | पिष्टः |
| ङ. | दृष्टः | | |

## योग्यताविस्तारः –

❖ पण्डिराजस्य परिचयः लेखनीयः।

❖ भामिनीविलासपरिचयः लेखनीयः।

❖ अन्योक्तिषु आगतानि सम्बोधनपदानि चेतव्यानि।

* * * * *